# MASTER OF ARTS EXAMINATION, 2025

## 2nd Year 4th Semester

## SANSKRIT

## COURSE: XIX/A

## [Sanskrit Drama]

Time: 2 Hours　　　　　　　　　　　　　　　　　　　　Full Marks: 30

### विभाग – क

१. अधोलिखिताः प्रश्नाः देवनागरीलिपिमाश्रित्य संस्कृतभाषया च समाधेयाः –

क. 'सिंहेनेव गजेन्द्रमद्रिशिखरात् सिंहासनात् पातितम्' – केनोक्तम् ? कदा वा उक्तम् ? अत्र या तुलना दीयते सैव लेखनीया । $\frac{1}{2}+1+1$

ख. अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते
देवः सर्गगतोऽपि शात्रववधेनाराधितः स्यादिति ॥

- केन कस्मिन् प्रसङ्गे इदमुक्तम् ? वक्तुः कीदृशः मनोभावः अत्र व्यक्तः जातः ? $\frac{1}{2}+1+1$

२. अधोलिखितेषु द्वयमाश्रित्य प्रसङ्गनिर्देशपूर्वकं तात्पर्यं लेखनीयम् - $5\times2=10$

क. विरुद्धयोर्भृशमिह मन्त्रिमुख्ययोर्महावने वनगजयोरिवान्तरे ।
अनिश्चयादगजवशयेव भीतया गतागतैर्ध्रुवमिह खिद्यते श्रिया ।।

ख. प्रविक्रमभक्तयः समुदिता येषां गुणा भूतये ।
ते भृत्या नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च ।।

ग. सुलभेष्वर्थलाभेषु परसंवेदने जनः ।
क इदं दुष्करं कुर्यादिदानीं शिविना विना ।।

### विभाग – ख

३. अधोलिखिताः प्रश्नाः देवनागरीलिपिमाश्रित्य संस्कृतभाषया समाधेयाः –

क. 'लोभस्य पुरतः कोऽमी सत्याऽस्तेयापरिग्रहाः' – अत्र कः वक्ता ? कस्मिन् प्रसङ्गे कामुद्दिश्य वक्ता इदमुक्तवान् ? $\frac{1}{2}+1\frac{1}{2}+\frac{1}{2}$

ख. एकामिषप्रभवमेव सहोदराणामुज्जृम्भते जगति वैरमिति प्रसिद्धम्' – केन कस्मिन् प्रसङ्गे उक्तमिदम् ? $\frac{1}{2}+1\frac{1}{2}$

ग. 'कोऽप्ययं पान्थो भागीरथीमुत्तीर्य साम्प्रतमित एवाभि..' केन कस्य विषये इदमुक्तम् ? $\frac{1}{2} + 1$

४. अधोलिखितेषु एकमाश्रित्य प्रसङ्गनिर्देशपूर्वकं तात्पर्यं लेखनीयम् - $4\frac{1}{2}$

क. गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ।।

ख. निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन तत्र कस्मान्न हन्यते ।।

५. 'प्रबोधचन्द्रोदयम्' इति दृश्यकाव्यस्य प्रथमाङ्के अवस्थितस्य विष्कम्भकस्य तात्पर्यं लेखनीयम् । $4\frac{1}{2}$

******